# devImAhAtmyastotram

# દેવીમાહાત્મ્યસ્તોત્રમ્ અથવા દુર્ગાસ્તોત્રમ્

## Document Information

Text title : devImAhAtmyastotram

File name : devImAhAtmyastotram.itx

Category : devii, durgA, stotra, devI, mAhAtmya

Location : doc_devii

Transliterated by : KSR Ramachandran

Proofread by : KSR Ramachandran

Latest update : December 7, 2013, October 15, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

October 15, 2022

*sanskritdocuments.org*

# દેવીમાહાત્મ્યસ્તોત્રમ્ અથવા દુર્ગાસ્તોત્રમ્

(શ્રીદુર્ગાસપ્તશતીસ્તોત્રમ્) (આપદુન્મૂલનદુર્ગાસ્તોત્રમ્)
લક્ષ્મીશે યોગનિદ્રાં પ્રભજતિ ભુજગાધીશતલ્પે સદર્પૌ
ઉત્પન્નૌ દાનવૌ તચ્છ્રવણમલમયાઙ્ગૌ મધું કૈટભં ચ ।
દૃષ્ટ્વા ભીતસ્ય ધાતુઃ સ્તુતિભિરભિનુતાં આશુ તૌ નાશયન્તીં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૧॥

યુદ્ધે નિર્જિત્ય દૈત્યસ્ત્રિભુવનમખિલં યસ્તદીયેષુ ધિષ્ણ્યે-
ષ્વાસ્થાય સ્વાન્ વિધેયાન્ સ્વયમગમદસૌ શક્રતાં વિક્રમેણ ।
તં સામાત્યાપ્તમિત્રં મહિષમપિ નિહત્યાસ્ય મૂર્ધાધિરૂઢાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૨॥

વિશ્વોત્પત્તિ-પ્રણાશ-સ્થિતિ-વિહૃતિ-પરે દેવિ ઘોરામરારિ-
ત્રાસાત્ ત્રાતં કુલં નઃ પુનરપિ ચ મહાસઙ્કટેષ્વીદૃશેષુ।
આવિર્ભૂયાઃ પુરસ્તાદિતિ ચરણ-નમત્-સર્વ-ગીર્વાણ-વર્ગાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૩॥

હન્તું શુમ્ભં નિશુમ્ભં ત્રિદશ-ગણ-નુતાં હેમડોલાં હિમાદ્રૌ
આરૂઢાં વ્યૂઢદર્પાન્ યુધિ નિહતવતીં ધૂમ્રદૃક્-ચણ્ડ-મુણ્ડાન્ ।
ચામુણ્ડાખ્યાં દધાનાં ઉપશમિત-મહા-રક્તબીજોપસર્ગાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૪॥

બ્રહ્મેશ-સ્કન્દ-નારાયણ-કિટિ-નરસિંહેન્દ્ર-શક્તીઃ સ્વભૃત્યાઃ
કૃત્વા હત્વા નિશુમ્ભં જિત-વિબુધ-ગણં ત્રાસિતાશેષલોકમ્ ।
એકીભૂયાથ શુમ્ભં રણશિરસિ નિહત્યાસ્થિતાં આત્તખડ્ગાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૫॥

ઉત્પન્ના નન્દજેતિ સ્વયમવનિતલે શુમ્ભમન્યં નિશુમ્ભં
ભ્રામર્યાખ્યારુણાખ્યં પુનરપિ જનની દુર્ગમાખ્યં નિહન્તુમ્ ।
ભીમા શાકમ્ભરીતિ ત્રુટિત-રિપુભટાં રક્તદન્તેતિ જાતાં

દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૬॥

ત્રૈગુણ્યાનાં ગુણાનાં અનુસરણ-કલા-કેલિ-નાનાવતારૈઃ
ત્રૈલોક્ય-ત્રાણ-શીલાં દનુજ-કુલ-વની-વહ્નિ-લીલાં સલીલામ્ ।
દેવીં સચ્ચિન્મયીં તાં વિતરિત-વિનમત્-સત્રિવર્ગાપવર્ગાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૭॥

સિંહારૂઢાં ત્રિનેત્રાં કરતલ-વિલસચ્છઙ્ખ-ચક્રાસિ-રમ્યાં
ભક્તાભીષ્ટપ્રદાત્રીં રિપુમથનકરીં સર્વલોકૈકવન્દ્યામ્ ।
સર્વાલઙ્કારયુક્તાં શશિયુતમકુટાં શ્યામલાઙ્ગીં કૃશાઙ્ગીં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૮॥

ત્રાયસ્વ સ્વામિનીતિ ત્રિભુવનજનનિ પ્રાર્થના ત્વય્યપાર્થા
પાલ્યન્તેઽભ્યર્થનાયાં ભગવતિ શિશવઃ કિન્ત્વનન્યા જનન્યાઃ ।
તત્તુભ્યં સ્યાન્નમસ્યેત્યવનત-વિબુધાહ્લાદિ-વીક્ષા-વિસર્ગાં
દુર્ગાં દેવીં પ્રપદ્યે શરણમહમશેષાપદુન્મૂલનાય ॥ ૯॥

એતં સન્તઃ પઠન્તુ સ્તવમખિલ-વિપજ્જાલતૂલાનલાભં
હૃન્મોહધ્વાન્ત-ભાનુ-પ્રથિતમખિલ-સઙ્કલ્પ-કલ્પદ્રુ-કલ્પમ્ ।
દૌર્ગં દૌર્ગત્ય-ઘોરાતપ-તુહિનકર-પ્રખ્યમંહો-ગજેન્દ્ર-
શ્રેણી-પઞ્ચાસ્ય-દેશ્યં વિપુલભયદ-કાલાહિ-તાર્ક્ષ્ય-પ્રભાવમ્ ॥ ૧૦॥

દુર્ગાં દેવીં શરણમહમ્ પ્રપદ્યે ॥

ઇતિ દેવીમાહાત્મ્યસ્તોત્રમ્ અથવા દુર્ગાસ્તોત્રમ્ અથવા શ્રીદુર્ગાસપ્તશતીસ્તોત્રં સમ્પૂર્ણમ્ ।
આપદુન્મૂલનદુર્ગાસ્તોત્રમ્ ચ

Encoded and proofread by KSR Ramachadran
This stotram is given as an appendix to a
commentary on Devimahatmyam by my Guru (spiritual
preceptor) the late Sri 'Anna' N Subramania Iyer,
published by The Ramakrishna Math, Myalpore,
Madras PIN 600004, India , sixth edition, 1986 (
VI- 3M3C-6-1986), No mention has been made there
as to the source or author of this stotram.
However, in the preface to the second edition

of this book, Sri Anna had mentioned this work alongside saptashatI yantra pUjanam, vArShika chaNDIvidhAnam , durgA chandrakalA stuti, and mahiShAsura mardinI stotram, so I think it as old as the others.

---

*devImAhAtmyastotram*

pdf was typeset on October 15, 2022

Please send corrections to *sanskrit@cheerful.com*